# Devaih Kritam 02 Devi Stotram

# देवैः कृतं २ देवीस्तोत्रम्

## Document Information

Text title : Devaih Kritam 02 Devi Stotram

File name : devaiHkRRitaM02devIstotram.itx

Category : devii, devI, shivapurANa, stotra

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : shivapurANa | rudrasaMhitA | pArvatIkhaNDa | adhyAya 4/9-19||

Latest update : March 5, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 5, 2025

*sanskritdocuments.org*

Devaih Kritam 02 Devi Stotram

# देवैः कृतं २ देवीस्तोत्रम्

देवा ऊचुः ।
शिवे शर्वाणि कल्याणि जगदम्ब महेश्वरि ।
त्वां नतास्सर्वथा देवा वयं सर्वार्तिनाशिनीम् ॥ ९॥

न हि जानन्ति देवेशि वेदाश्शास्त्राणि कृत्स्नशः ।
अतीतो महिमा ध्यानं तव वाङ्मनसोश्शिवे ॥ ३.४.१०॥

अतद्व्यावृत्तितस्त्वां वै चकितं चकितं सदा ।
अभिधत्ते श्रुतिरपि परेषां का कथा मता ॥ ११॥

जानन्ति बहवो भक्तास्त्वत्कृपां प्राप्य भक्तितः ।
शरणागतभक्तानां न कुत्रापि भयादिकम् ॥ १२॥

विज्ञप्तिं शृणु सुप्रीता यस्या दासास्सदाम्बिके ।
तव देवि महादेवि हीनतो वर्णयामहे ॥ १३॥

पुरा दक्षसुता भूत्वा सञ्जाता हरवल्लभा ।
ब्रह्मणश्च परेषां वा नाशयत्वमकं महत् ॥ १४॥

पितृतोऽनादरं प्राप्यात्यजः पणवशात्तनुम् ।
स्वलोकमगमस्त्वं चालभद्दुःखं हरोऽपि हि ॥ १५॥

न हि जातम्प्रपूर्णं तद्देवकार्यं महेश्वरि ।
व्याकुला मुनयो देवाश्शरणं त्वां गता वयम् ॥ १६॥

पूर्णं कुरु महेशानि निर्जराणां मनोरथम् ।
सनत्कुमारवचनं सफलं स्याद्यथा शिवे ॥ १७॥

अवतीर्य क्षितौ देवि रुद्रपत्नी पुनर्भव ।
लीलां कुरु यथायोग्यं प्राप्नुयुर्निर्जरास्सुखम् ॥ १८॥

सुखी स्याद्देवि रुद्रोऽपि कैलासाचलसंस्थितः ।

सर्वे भवन्तु सुखिनो दुःखं नश्यतु कृत्स्नशः ॥ १९॥

इति शिवपुराणे रुद्रसंहितायां पार्वतीखण्डे चतुर्थाध्यायान्तर्गतं
देवैः कृतं देवीस्तोत्रं समाप्तम् ।

शिवपुराण । रुद्रसंहिता । पार्वतीखण्ड । अध्याय ४/९-१९॥

shivapurANa . rudrasaMhitA . pArvatIkhaNDa . adhyAya 4/9-19..

Proofread by PSA Easwaran

---

*Devaih Kritam 02 Devi Stotram*

pdf was typeset on March 5, 2025

Please send corrections to *sanskrit@cheerful.com*